[1]प्रणान्-प्रणामौ-प्रणामः ; — — —

[2]नतम्-नतः-नतवान्, नमितः-नामितः-प्रणमितः, निनंसितः, नंनमितः-तवान्;

नमः, [3]नृनमः, [4]प्रणामी, [5]नप्ता, [6]नेमिः, [7]नमनः, [8]नम्रः,-प्रणम्रः,[A]

नमः-नामः-प्रणमः, निनंसुः, नंनमः;

नन्तव्यम्, नमयितव्यम्-नामयितव्यम्-प्रणमयितव्यम्, निनंसितव्यम्,

नंनमितव्यम्;

नमनीयम्, नमनीयम्-नामनीयम्-प्रणमनीयम्, निनंसनीयम्, नंनमनीयम्;

[9]नम्यम्, नम्यम्-नाम्यम्-प्रणम्यम्, निनंस्यम्, नंनम्यम्;

ईषन्नमः-[10]दुर्नमः-सुनमः ; — — —

नम्यमानः-नम्यमानः-नाम्यमानः-प्रणम्यमानः, निनंस्यमानः, [B]नंनम्यमानः;

---

1. क्विपि, 'अनुनासिकस्य क्विझलोः—' (6-4-15) इति उपधादीर्घे, 'मो नो धातोः' (8-2-64) इति नत्वे, णत्वे च रूपम्।

2. 'अनुदात्तोपदेशवनतितनोत्यादीनाम्—' (6-4-37) इत्यनुनासिकलोपः। एवं **नतिः नत्वा** इत्यत्रापि नलोपो बोध्यः।

3. नृन् नमयतीति **नृनमः**। ण्यन्तात्, अन्तर्भावितण्यन्तात् शुद्धाद्वा धातोः पचाद्यच्। 'क्षुभ्नादिषु च' (8-4-39) इत्यत्र पाठात् णत्वं न। एवं **नृनमन**मित्यत्रापि ज्ञेयम्।

4. ताच्छील्ये णिनिः। णत्वम्।

5. 'तृन्' (3-2-135) इति ताच्छीलिके तृनि, 'अप्तृन्तृच्स्वसृनप्तृ—' (6-4-11) इति सूत्रे निपातनात् मकारस्य पकार इति **माधव**धातुवृत्तिः। संज्ञाशब्दत्वान्नावयवार्थेऽभिनिवेशः कार्यः। पौत्रस्य अपत्यम्=**नप्ता**।

6. 'भाषायां धाञ्कृसृजनिगमिनमिभ्यः—' (वा. 3-2-171) इति किः किन् वा प्रत्ययः। तस्य लिड्वद्भावातिदेशात् द्वित्वे, एत्वाभ्यासलोपयो रूपम्। **नेमिः**= रथनाभिः।

7. शब्दार्थकत्वादस्य 'चलनशब्दार्थादकर्मकात्—' (3-2-148) इति ताच्छीलिको युच्।

8. '**नमि**कम्पि—' (3-2-167) इति ताच्छीलिको रप्रत्ययः।

9. 'पोरदुपधात्' (3-1-98) इति यत्।

10. 'दुरः षत्वणत्वयोरुपसर्गत्वप्रतिषेधः—' (वा. 1-4-60) इति वचनान्न णत्वम्।

A. 'द्रुतविगमितविप्रयोगचिह्नामपि तनयां नृपतिः पदप्रणम्राम्।' नैषधे 4.18.

B. '**नंनम्यमानाः** फलदित्सयेव चकाशिरे तत्र लता विलोलाः॥' भ. का. 2.25.